॥पुरुष सूक्तम्॥

puruṣa sūktam

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः।

ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं चतुष्पदे। ॐ शान्तिः शान्तिः शान्तिः॥

tacchaṁ yorāvṛṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye | daivī svastirastu naḥ | svastirmānuṣebhyaḥ |

ūrdhvaṁ jigātu bheṣajam | śaṁ no astu dvipade | śaṁ catuṣpade|
om śāntiḥ śāntiḥ śāntiḥ ||

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्।

sahasraśīrṣā puruṣaḥ | sahasrākṣaḥ sahasrapāt |

स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्॥

sa bhūmiṁ viśvato vṛtvā | atyatiṣṭhaddaśāṅgulam ||

पुरुष एवेदगं सर्वम्। यद्भूतं यच्च भव्यम्।

puruṣa evedagṁ sarvam | yadbhūtam yacca bhavyam

radiosai

उतामृतत्वस्येशानः । यदन्नेनातिरोहति ॥

utāmṛtatvasyeśānaḥ | yadannenātirohati ||

एतावानस्य महिमा । अतो ज्यायाग्ँश्च पूरुषः ।

etāvānasya mahimā | ato jyāyāgśca pūruṣaḥ |

पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि ॥

pādo'sya viśvā bhūtāni | tripādasyāmṛtaṁ divi ||

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाऽऽभवात्पुनः ।

tripādūrdhva udaitpuruṣaḥ | pādo'syehā''bhavātpunaḥ |

ततो विष्वङ्व्यक्रामत् । साशनानशने अभि ॥

tato viṣvaṅvyakrāmat | sāśanānaśane abhi ||

तस्माद्विराडजायत । विराजो अधि पूरुषः ।

tasmādvirāḍajāyata | virājo adhi pūruṣaḥ |

स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥

sa jāto atyaricyata | paścādbhūmimatho puraḥ ||

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत ।

yatpuruṣeṇa haviṣā | devā yajñamatanvata |

वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः ॥

vasanto asyāsīdājyam | grīṣma idhmaśśaraddhaviḥ ||

सप्तास्यासन्परिधयः । त्रिः सप्त समिधः कृताः ।

saptāsyāsanparidhayaḥ | triḥ sapta samidhaḥ kṛtāḥ |

देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् ॥

devā yadyajñaṁ tanvānāḥ | abadhnanpuruṣaṁ paśum |

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ।

taṁ yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ |

तेन देवा अयजन्त । साध्या ऋषयश्च ये ॥

tena devā ayajanta | sādhyā ṛṣayaśca ye ||

तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् ।

tasmādyajñātsarvahutaḥ | sambhṛtaṁ pṛṣadājyam |

पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ॥

paśūgstāgścakre vāyavyān | āraṇyāngrāmyāśca ye |

तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।

tasmādyajñātsarvahutaḥ | ṛcaḥ sāmāni jajñire |

छन्दाग्ंसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत ॥

chandāgṁsi jajñire tasmāt | yajustasmādajāyata |

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः ॥

tasmādaśvā ajāyanta | ye ke cobhayādataḥ | gāvo ha jajñire tasmāt | tasmājjātā ajāvayaḥ ||

यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्।

yatpuruṣaṁ vyadadhuḥ | katidhā vyakalpayan |

मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते ॥

mukhaṁ kimasya kau bāhū | kaavūrū pādāvucyete ||

ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः।

brāhmaṇo'sya mukhamāsīt | bāhū rājanyaḥ kṛtaḥ |

ऊरु तदस्य यद्वैश्यः। पद्भ्याग्ं शूद्रो अजायत ॥

ūru tadasya yadvaiśyaḥ | padbhyāgṁ śūdro ajāyata ||

चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत।

candramā manaso jātaḥ | cakṣoḥ sūryo ajāyata |

मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ॥

mukhādindraścāgniśca | prāṇādvāyurajāyata ||

नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।

nābhyā āsīdantarikṣam | śīrṣṇo dyauaḥ samavartata |

पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्ं अकल्पयन् ॥

padbhyāṁ bhūmirdiśaḥ śrotrāt | tathā lokāgm akalpayan ||

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तुपारे ।

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasastupāre |

सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् ,यदास्ते ॥

sarvāṇi rūpāṇi vicitya dhīraḥ | nāmāni kṛtvā'bhivadan , yadāste ||

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।

dhātā purastādyamudājahāra | śakraḥ pravidvānpradiśaścatasraḥ |

तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ॥

tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā ayanāya vidyate ||

radiosai

यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्।

yajñena yajñamayajanta devāḥ | tāni dharmāṇi prathamānyāsan |

ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः॥

te ha nākaṁ mahimānaḥ sacante | yatra pūrve sādhyāḥ santi devāḥ ||

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि।

adbhyaḥ sambhūtaḥ pṛthivyai rasācca || viśvakarmaṇaḥ samavartatādhi |

तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे॥

tasya tvaṣṭā vidadhadrūpameti | tatpuruṣasya viśvamājānamagre ||

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्।

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasaḥ parastāt |

तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय॥

tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā vidyate'yanāya ||

radiosai

प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते।

prajāpatiścarati garbhe antaḥ | ajāyamāno bahudhā vijāyate |

तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः॥

tasya dhīrāḥ parijānanti yonim | marīcīnām padamicchanti vedhasaḥ ||

यो देवेभ्य आतपति। यो देवानां पुरोहितः।

yo devebhya ātapati | yo devānām purohitaḥ |

पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये॥

pūrvo yo devebhyo jātaḥ | namo rucāya brāhmaye |

रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्।

rucam brāhmam janayantaḥ | devā agre tadabruvan |

यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे॥

yastvaivam brāhmaṇo vidyāt | tasya devā asan vaśe |

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे।

hrīśca te lakṣmīśca patnyau | ahorātre pārśve |

नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्।

nakṣatrāṇi rūpam | aśvinau vyāttam |

radiosai

इष्टं मनिषाण ।अमुं मनिषाण ।सर्वं मनिषाणा ॥

iṣṭaṁ maniṣāṇa | amuṁ maniṣāṇa | sarvaṁ maniṣāṇā|

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः।

ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं चतुष्पदे।

taccham yorāvṛṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye | daivī svastirastu naḥ | svastirmānuṣebhyaḥ |
ūrdhvaṁ jigātu bheṣajam | śaṁ no astu dvipade | śaṁ catuṣpade|

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ||